**आगमन** न० आ+गम—भावे ल्युट्। १ किञ्चिद्देशावधिक-विभागजनकक्रियायामागतौ। "संवत्सरे व्यतीते तु पुनरागमनाय च" दुर्गाविसर्ज्जनमन्त्रः। २ प्राप्तौ "एतत्ते सर्व्वमाख्यातं वैरस्यागमनं महत्" रामा०। ३उ-त्पत्तौ च "आगमापायिनोऽनित्याः" गीता। [आगमयुक्ते

**आगमवत्** त्रि० आगमः अस्त्यर्थे मतुप् मस्य वः स्त्रियां ङीप्।

**आगमवृद्ध** त्रि० आगमेन तज्ज्ञानेन वृद्धः। शास्त्रालो-चनाजनितपरिणतज्ञाने "प्रतीप इत्यागमवृद्धसेवी" रघुः।

**आगमवेत्तृ** त्रि० आगमं वेत्ति विद्—तृच् ६त०। स्त्रियां ङीप्। आगमाभिज्ञे।

**आगमवेदिन्** त्रि० आगमं वेत्ति विद्—णिनि ६त०। १ आगमवेत्तरि २ शङ्कराचार्य्यपरमगुरौ गौड़पादा-चार्य्ये पु०।

**आगमापायिन्** त्रि० आगमस्य अपायस्य तौ विद्येते अस्य इनि स्त्रियां ङीप्। उत्पत्तिविनाशशीले "आगमा-पायिनोऽनित्यास्तांस्तितिक्षस्व भारत!" गीता।

**आगमावर्त्ता** स्त्री आगममात्रेण प्राप्तिमात्रेण आवर्त्तते कण्डूयनमस्याः आ+वृत-अपादाने घञ्। वृश्चिकाल्यां (विछाति) क्षुपभेदे।

**आगमिक** त्रि० आगमादागतः ठञ्। आगमप्राप्ते।

**आगमित** त्रि० आ+गम—स्वार्थे-णिच्—क्त। अधीते ज्ञाते २पठिते। प्रेरणे णिच् क्त। यापिते ३प्रापिते च।

**आग(गा)मिन्** त्रि० आ+गम—भविष्यति णिनि गम्यादीना-मुपसंख्यानमित्युक्तेः वा ह्रस्वः। भविष्यदागमने ग्रामगमी" सि०कौ०। "यद्वागामिक्रियामुख्यकालस्याप्यन्तरालवत्" कात्या०स्रू०। "आगामिवर्त्तमानाहर्युक्तायां निशि पक्षिणी" अमरः स्त्रियां ङीप्। "आगामिनीं जगृहिरे जनता-स्तरूणाम्" माघः।

**आगर** पु० आगीर्य्यते उद्गमितुमारभ्यते चन्द्रमा अत्र आ+गॄ—आधारे अप्। अमावास्यायां तत्र शेषयामे भक्षिता हि चन्द्रकलाः देवैः उद्गमितुमारभ्यन्ते इति तस्यास्तथा-त्वम्। "चतुर्द्दश्यष्टमांशे च क्षीणो भवति चन्द्रमाः। अमावा-स्याष्टमांशे च ततः किल भवेदणुः" इत्युक्तेस्तस्यास्तथात्वम्।

**आगवीन** त्रि० गोः प्रत्यर्पणपर्य्यन्तं कर्म्म करोति मर्य्यादाया-मव्ययीभा० आगु+कर्म्मकारकार्थे ख। गोः प्रत्यर्पणपर्य्य-न्तकर्मकरे गोपालकभेदे। गोपालकस्य द्विविधः दिवामात्रं गोःप्रचारणे नियुक्तः। दिवारात्रं योगक्षेमे नियुक्तश्च। "दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे। योगक्षे-मेऽन्यथा चेत्तु पालो वक्तव्यतामियात्" मनुना दिवारात्र भेदेन पालकद्वयविषये दोषभेदविधानात् तथा विभागः। तत्र दिवापालकविषये याज्ञ० "यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत्तथा। प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतन" इति।

**आगस्** न० "इण आग अपराधे" उणा० इण्—असुन् आगादेशः। १अपराधे "मदीये हृदये नूनं सखि! नागो न विद्यते। वदन्तो सर्पसर्पेति किं नालिङ्गसि मामिति" उज्ज्वलदत्तीये। "सहिष्ये शतमागांसि सूनोस्त इति यत्त्वया" माघः। "अभ्यस्य मागस्कृतमस्पृशद्भिः" रघुः। "दासे कृतागसि भवत्युचितः प्रहारः" सा०द०। अपराधश्च स्वकर्त्तव्यकर्म्मणः स्खलनम्। अपराधशब्दे २२२पृ० विवृतिः आगस्कर्त्ता आगस्कारी। २पापे ३दण्डे च।

**आगस्ती** स्त्री अगस्त्येयम् अण् स्त्रियां ङीप् यलोपः। दक्षिणस्यां दिशि। [अगस्त्यहितकारके।

**आगस्तीय** त्रि० अगस्तये हितम् छण् यलोपः।

**आगस्त्य** त्रि० अगस्त्यस्येदम् यञ् यलोपः। अगस्त्यसम्बन्धिनि दक्षिणदिग्भागे "कौवेरदिग्भागमपास्य मार्गमागस्त्यमुष्णांशुर-रावतीर्णः" माघः "अगस्त्यस्य स्थितिस्थानमुक्तम्" सू०सि० "अशीतिभागैर्याम्यायामगस्त्योमिथुनान्तगः"। स्वकीयक्रान्ति विभागस्थानात् दक्षिणस्यामशीत्यंशैस्ताराात्मकः अगस्त्यः मिथुनान्तगः कर्क्कादिभागे स्थितः" रङ्गनाथः। एवञ्च तस्य दक्षिणदिग्भागगतत्वेन तद्भागस्यागस्त्यसम्बन्धित्वम् अगस्तेरपत्यं गर्गा० यञ्। २अगस्तेरपत्ये पुंस्त्री० अगस्त्य+कण्वादि० अण्। ३तद्गोत्रापत्ये पुंस्त्री उभयत्र स्त्रियां ङीप् यलोपः।

**आगाध** त्रि० अगाध एव स्वार्थे अण्। १अतलस्पर्शे २दुरधि-गमे च। [ न्तुकशब्दार्थे च।

**आगान्तु** पु० आ+गम—तुन् नि०वृद्धिः। १अतिथौ २आग-

**आगामक** त्रि० आगमयति भविष्यद्वस्तु बोधयति आ+गम—णिच्—ण्वुल्। भविष्यदावेदके। "मतिरागामिका ज्ञेया बुद्धिस्तत्कालदर्शिनी"। [कालवृत्तौ च।

**आगामिन्** त्रि० आगमिवत्। १आगन्तुके २भविष्यत्-

**आगामुक** त्रि० आ+गम—उकञ्। आगमनशीले। "सुग्रीव-स्त्वार्जितं मित्रं सर्व्वांश्चागामुकान् द्रुतम्" भट्टिः।

**आगार** न० अग—कुटिलायां गतौ घञ् आगमृच्छति ऋ—अण् उप०स०। गृहे भवने।

**आगारगोधिका** स्त्री ७त०। गृहगोधिकायाम् (टिक्टिकि)।

**आगारधूम** पु० आगारं गृहं धूमयति धूमान्वितं करोति